विशय:, पुं, (वि+शी+अच् ।) संशय: । यथा,
"विषयो विशयश्चैव पूर्व्वपक्षस्तथोत्तरम् ।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम् ॥"
विषयो विचारार्हवाक्यम् । विशयोऽस्यायमर्थो न वा इति संशय: । इति तिथ्यादितत्त्वम् ॥ आश्रय: । इति केचित् ॥

विशयी, [न्] त्रि, ( विशयोऽस्यस्येति । विशय+इनि: । ) संशयी । इति विशयशब्दार्थदर्शनात् ॥

विशर:, पुं, (वि+शॄ हिंसायाम्+अप् ।) वध: । इत्यमर: ॥

विशरणं, क्ली, ( वि+शॄ+ल्युट् । ) मारणम् । इति हेमचन्द्र: ॥

विशल्य:, त्रि, ( विगतं शल्यं यस्मात् । ) शल्यरहित: । यथा,—
"सशल्य: स समाघ्राय लक्ष्मण: परवीरहा ।
विशल्यो विरुज: शीघ्रमुदतिष्ठन् महीतलात् ॥"
इति श्रीरामायणे युद्धकाण्डे १०२ सर्ग: ॥

विशल्याकरणी, स्त्री, ( विशल्यं क्रियतेऽनयेति । विशल्य+कृ+ल्युट् । ङीप् ।) औषधिविशेष: । यथा,—
"पूर्व्वन्तु कथितो योऽसौ वीर जाम्बवता तव ,
दक्षिणे शिखरे जातां महौषधिमिहानय ॥
विशल्यकरणीं नाम्ना सावर्ण्यकरणीं तथा ।
संजीवकरणीं वीर सन्धानीञ्च महौषधीम् ॥"
इति रामायणे वाल्मीकीये युद्धकाण्डे १०३ सर्ग: ॥

विशल्यकृत्, पुं, ( विशल्यं शस्त्रप्रहारजन्यवेदनादिनाशं करोतीति । कृ+क्विप् ।) विशालोदृक्ष: । हापरमालीति ख्यात: । तत्पर्य्याय: । अक्षोड्क: २ सुकल्क: ३ भूपलाश: ४ । इति रत्नमाला ॥ आस्फोत: ५ आचरप्रिय: ६ । इति शब्दचन्द्रिका । विशल्यकारिणि, त्रि ॥

विशल्या, स्त्री, ( विगतं शल्यन्तत्प्रहारादिजनितवेदनादिनाशो यया । ) गुडूची । ( अस्या: पर्य्यायो यथा,—
"गुडूची मधुपर्णी स्यादमृतामृतवल्लरी ।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च ॥
जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली ।
चक्रलक्षणिका धीरा विशल्या च रसायनी ॥
चन्द्रहासी वय:स्था च मण्डली देवनिर्म्मिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे ॥)
अग्निशिखावृक्ष: । (अस्या: पर्य्यायो यथा,—
"कलिहारी तु हलिनी लाङ्गली शक्रपुष्प्यपि ।
विशल्याग्निशिखानन्ता वह्निवक्त्रा च गर्भनुत् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे ॥)
दन्ती । इत्यमर: ॥ (अस्या: पर्य्यायो यथा,—
"लगुदन्ती विशल्या च स्यादुदुम्बरपर्ण्यपि ।
तथैरण्डफला शीघ्रा श्येनघण्टाघुणप्रिया ॥
वाराहाङ्गी च कथिता निकुम्भश्च मकूलक: ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
त्रिपुटा । इति मेदिनी ॥ कलिकारी । अजमोदा । इति राजनिर्घण्ट: ॥ ( नदीविशेष: । यथा, महाभारते । २ । ९ । २० ।
"किम्पुना च विशल्या च तथा वैतरणी नदी ॥")

विशसनं, क्ली, ( वि+शस हिंसायाम्+ल्युट् । ) मारणम् । इत्यमर: ॥ ( यथा, हरिवंशे । ९९ । ४३ ।
"तस्मिन् विशसने घोरे चक्रलाङ्गलसंप्लवे ।
दारुणानि प्रवृत्तानि रक्षांस्यौत्पातिकानि च ॥"
नरकविशेष: । यथा, भागवते । ५ । २६ । ७ ।
"प्राणरोधो विशसनं लालाभक्ष: सारमेयादनमवीचिरय:पानमिति ॥" * ॥ विनाशकारिणि, त्रि । यथा, महाभारते । ६ । ५९ । ६० ।
"यमदण्डोपमां गुर्व्वीमिन्द्राशनिसमस्वनाम् ।
अपश्याम महाराज रौद्रीं विशसनीं गदाम् ॥")

विशसन:, पुं, ( विशसति छिनत्तीति । वि+शस हिंसायाम्+ल्यु: । ) खड्ग: । इति त्रिकाण्डशेष: ॥ ( यथा, महाभारते । १२ । १६६ । ८३—८४ ।
"असेरष्टौ हि नामानि रहस्यानि निबोध मे ।
पाण्डवेय सदा यानि कीर्त्तयन् लभते जयम् ॥
असिर्व्विशसन: खड्गस्तीक्ष्णधारो दुरासद: ।
श्रीगर्भो विजयश्चैव धर्म्मपालस्तथैव च ॥")

विशसित:, त्रि, मारित: । विपूर्व्वशसधातो: क्तप्रत्ययेन निष्पन्न: । इति सिद्धान्तकौमुदी ॥

विशस्त:, त्रि, अविनीत: । धृषिशसी वैयात्ये । एतौ निष्ठायामविनये एवानिटौ स्त: । धृष्टो विशस्त: । अन्यत्र धर्षित: । विशसित: । इति सिद्धान्तकौमुदी ॥

विशस्ता, [ ऋ ] पुं, ( वि+शस हिंसायाम्+तृच् । ) चाण्डाल: । इति संक्षिप्तसारोणादिवृत्ति: ॥ ( हिंसाकारके, त्रि । यथा, महाभारते । १२ । ११५ । ४९ ।
"आहर्त्ता चानुमन्ता च विशस्ता क्रयविक्रयी ।
संस्कर्त्ता चोपभोक्ता च खादक: सर्व्व एव ते ॥"
पापिन इति शेष: ॥)

विशाकर:, पुं, भद्रचूड: । इति शब्दचन्द्रिका ॥ लङ्कासिज् इति भाषा ॥

विशाख:, पुं, कार्त्तिकेय: । इत्यमर: ॥ ( यथा, महाभारते । ३ । २३१ । ७ ।
"प्रभुर्नेता विशाखश्च नैगमेय: सुदुश्चर: ॥")
धन्विनां वितस्त्यन्तरेण पादसंस्थानम् । इति भरत: ॥ याचक: । इति मेदिनीकरहेमचन्द्रौ ॥ पुनर्नवा । इति राजनिर्घण्ट: ॥ (विगता शाखा यस्य । शाखाविहीने, त्रि । यथा, हरिवंशे । ४८ । ५२ ।
"कबन्धोऽवस्थित: संख्ये विशाख इव पादप: ॥")

विशाखज:, पुं, नारङ्ग: । इति शब्दचन्द्रिका ॥ विशाखजाते, त्रि ॥

विशाखलं, क्ली, युद्धकाले मध्ये विन्यस्तपादद्वयम् । यथा,—
"विशाखान्तरविन्यस्ते पादयुग्मे विशाखलम् ॥"
इति शब्दमाला ॥

विशाखा, स्त्री, कठिल्लक: । इति मेदिनी ॥ अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतषोडशनक्षत्रम् । तत्पर्य्याय: । राधा २ । इत्यमर: ॥ "विशाखे द्वे । 'पत्नीमध्यगतस्तत्र सुग्रीव: प्लवगेश्वर: ।
विशाखयोर्मध्यगत: संपूर्ण इव चन्द्रमा: ॥'
इति रामायणम् ॥
अतएव द्वित्वमुचितं किन्तु एकतारापेक्षया एकवचनमिहोक्तम् ।" इति भरत: ॥ तस्या रूपं तोरणाकारचतुस्तारामयम् । इति मुहूर्त्तचिन्तामणि: ॥
"तोरणाकृतिनि पञ्चतारके
तारकेशवदने विशाखभे ।
तन्वि यान्ति विबुधाध्वमध्यगे
कुम्भतो रसभुजा: कला: प्रिये ॥"
ई । ०।२६। इति कालिदासकृतरात्रिलग्ननिरूपकग्रन्थ: ॥ अस्या अधिदेवते शक्राग्नी । इयं मिश्रगणान्तर्गता । इति ज्योतिस्तत्त्वम् ॥ * ॥ तत्र जातफलम् ।
"सदानुरक्तो विविधक्रियायां
सुवर्णकारैरपि सख्यमेति ।
यस्य प्रसूतौ च भवेत् विशाखा
सखा न कस्यापि भवेत् प्रसूत: ॥"
इति कोष्ठीप्रदीप: ॥

विशातन:, त्रि, ( वि+शत+णिच्+ल्यु: । ) मोचनकर्त्ता । (यथा, महाभारते । ७।८१।१८।
"नमस्ते देवदेवेश सनातन विशातन ।
विष्णो जिष्णो हरे कृष्ण वैकुण्ठ पुरुषोत्तम ॥")
यथा च ।
"साधु वीर त्वया पृष्टमवतारकथां हरे: ।
यत्त्वं पृच्छसि मर्त्त्यानां मृत्युपाशविशातनीम् ॥"
इति श्रीभागवते ३ स्कन्धे १४ अध्याय: ॥
"मृत्यो: पाशं विशातयति मोचयतीति तथा ।"
इति तट्टीकायां श्रीधरस्वामी ॥ ( वि+शत+णिच्+ल्युट् । पातने, क्ली । यथा, महाभारते । ७ । १२ । १९ ।
"यतमाना: प्रयत्नेन द्रोणानीकविशातने ।
न शेकु: स्वकया बुद्ध्या तद्धि द्रोणेन पालितम् ॥")

विशाय:, पुं, (वि+शी+"व्युपयो: शेते: पर्य्याये ।" ३ । ३ । ३९ । इति घञ् । ) प्रहरिकादीनां क्रमेण शयनम् । यथा, अमरे ।
"उपशायो विशायश्च पर्य्यायशयनार्थकौ ॥"

विशारणं, क्ली, ( वि+शॄ+णिच्+ल्युट् । ) मारणम् । इति हेमचन्द्र: ॥

विशारद:, त्रि, विद्वान् । (यथा, मनु: । ७ । ६३ ।
"दूतञ्चैव प्रकुर्व्वीत सर्व्वशास्त्रविशारदम् ॥")
प्रगल्भ: । इत्यमर: ॥ प्रसिद्ध: । इति हारावली ॥ श्रेष्ठ: । इत्यजयपाल: ॥ बकुले, पुं । इति राजनिर्घण्ट: ॥

विशारदा, स्त्री, क्षुद्रदुरालभा । इति राजनिर्घण्ट: ॥

विशाल:, त्रि, (वि+"वे: शालच्छङ्कटचौ ।" इति शालच् । यद्वा, विश प्रवेशने+"तमिविशि-